पानीयं प्रचुरं सर्पिः प्रभूतं हिङ्गु जीरकम् ॥
हरिद्रामार्द्रकं शुण्ठी लवणं मरिचानि च ।
तण्डुलां चापि गोधूमान् जम्बीराणां रसान् बहून् ॥
यथा सर्व्वाणि वस्तूनि सुपक्वानि भवन्ति हि ।
तथा पचेत निपुणो बहुमण्डस्थितिर्यथा ॥
एषा हरीषा बलकृद्वातपित्तापहा गुरुः ।
शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी ॥”

इति भावप्रकाशः ॥

हरेणुः, स्त्री, (ह्रियते इति । हृ + “कृहृभ्यामेणुः ।” उणा० २ । १ । इति एणुः ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२० ॥ कुलयोषित् । इति मेदिनी ॥

हरेणुः, पुं, (ह्रियते इति । हृ + एणुः ।) सतीलः । इति मेदिनी ॥ (गुणादयोऽस्य सतीलशब्दे ज्ञातव्याः ॥)

हरेणुकः, पुं, (हरेणुरिव । कन् ।) कलायः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
“कलायो वर्त्तुलः प्रोक्तः सतीलश्च हरेणुकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हर्त्ता, [ऋ] पुं, (हरति ध्वान्तमिति । हृ + तृच् ।) सूर्य्यः । यथा,—
“लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥”

इति शाम्बपुराणे सूर्य्यस्तवः ॥

हरणकर्त्तरि, त्रि ॥ (यथा, भागवते ।४।२४।५।
“अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत ।
य इन्द्रमश्वहर्त्तारं विद्वानपि न जघ्निवान् ॥”)

हर्म्म, [न्] क्ली, (हरति ग्लानिमिति । हृ + मनिन् ।) जृम्भणम् । इति शब्दरत्नावली ॥

हर्म्मितं, त्रि, (हर्म्म जातमस्येति । इतच् ।) क्षिप्तम् । दग्धम् । इति मेदिनी ॥ जृम्भितम् । इति हर्म्मशब्दार्थदर्शनात् ॥

हर्म्मुटः, पुं, सूर्य्यः । कच्छपः । इति केचित् ॥

हर्म्म्यं, क्ली, (हरति जनमनांसीति । हृ + अघ्न्यादित्वात् यत् मुट् च । धनिनां वासः । इत्यमरः । २ । २ । ९ ॥ धनिनां व्यवहारिकादीनां वासः काष्ठेष्टकादिना कृतं धवलगृहं हर्म्म्यादिसंज्ञकं स्यात् । हरति मनो हर्म्म्यं नाम्नीति हृञो म्यः इति भरतः । अन्यच्च । हरति मनो हर्म्म्यं अघ्न्यादित्वात् यत् मुट् च हर्म्म्यम् । आदिशब्देन स्वस्तिकाट्टालिकादेर्ग्रहणम् । धनिनां राजव्यतिरिक्तानां वासो गृहम् । एकं काष्ठेष्टकादिकृतस्य धनिगृहस्य । इत्यमरटीकायां रायमुकुटः ॥ (यथा,—
“हर्म्म्यप्राक्षेदिभूमिर्नभसि च शयनं शीकरोष्णप्रहीणे ॥”
इति वैद्यकपथ्यापथ्यविधौ वर्षोपचारे ॥)

हर्य्य, क्रमे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-क्रमे अक०-गतौ सक०-सेट् ।) रेफोपधः । हर्य्यति । क्रमो ग्लानिः । इति दुर्गादासः ॥

हर्य्यक्षः, पुं, (हरि पिङ्गलं अक्षि यस्य । षच् ।) सिंहः । इत्यमरः । २ । ५ । १ ॥ कुवेरः । इति जटाधरः ॥ (पिङ्गलनेत्रे, त्रि । यथा, महाभारते । ३ । ३०७ । ५ ।
“तथैवावद्धकवचं कनकोज्ज्वलकुण्डलम् ।
हर्य्यक्षं वृषभस्कन्धं यथास्य पितरं तथा ॥”)

हर्य्यतः, पुं, (हर्य्यति गच्छतीति । हर्य्य + “भृमृदृशियजीति ।” उणा० ६ । ११० । इति अतच् ।) घोटकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ अश्वमेधीयाश्वः ! इत्युणादिकोषः ॥

हर्य्यश्वः, पुं, (हरिनामा हरिवर्णो वा अश्वो यस्य ।) इन्द्रः । इति केचित् ॥ (यथा, भागवते । ८ । ११ । २१ ।
“हरीन् दशशतान्याजौ हर्य्यश्वस्य बलः शरैः ।
तावद्भिरर्द्दयामास युगपल्लघुहस्तवान् ॥”
हरिनामा हरिवर्णो वा अश्वः इति कर्म्मधारयेण इन्द्राश्वः । यथा, महाभारते । ३ । २८९ । १३ ।
“अयं हर्य्यश्वयुग् जैत्रो मघोनः स्यन्दनोत्तमः ।
अनेन शक्रः काकुत्स्थ समरे दैत्यदानवान् ।
शतशः पुरुषव्याघ्र ! रथोदारेण जघ्निवान् ॥”)

हर्षः, पुं, (हृष तुष्टौ + घञ् ।) इष्टश्रवणजन्यसुखम् । इति महाभारते मोक्षधर्म्मः ॥ आह्लादः । तत्पर्य्यायः । मुत् २ प्रीतिः ३ प्रमदः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ शर्म्म १० शातम् ११ सुखम् १२ इत्यमरः । १ । ४ । २४ ॥ मुदा १३ मुदिता १४ आनन्दिः १५ नन्दिः १६ सातम् १७ सौख्यम् १८ । केचित्तु मुदादिसप्तकं प्रीतौ आनन्दथ्वादिपञ्चकं सुखे । प्रीतिश्च सुखजो विकारः इत्याहुः । इति तट्टीकायां भरतः ॥ तथा च ।
“मुत् प्रीतिः प्रमदामोदसम्मोदमोदसम्मदाः ।
प्रमोदो हर्ष इत्येव हर्षपर्य्याय ईरितः ॥
आनन्दो नन्दथुर्नन्दः सुखमानन्दथुर्म्मुदा ।
सौख्यं शर्म्मोपजोषः स्यादानन्दं जोषमित्यपि ॥
मुदादिजोषपर्य्यन्तमेकपर्य्यायः इत्यपि ॥”

इति शब्दरत्नावली ॥ * ॥

हर्षस्य पुत्त्रः कन्दर्पः । यथा,—

पुलस्त्य उवाच ।

“कन्दर्पो हर्षतनयो योऽसौ कामो निगद्यते ।
स शङ्करेण संदग्धो ह्यनङ्गत्वमुपागतः ॥”

इति वामने ५ अध्यायः ॥

(रोमाञ्चः । यथा । “हृष्येते हर्षयुक्तौ भवतः हर्षश्च रोमाञ्चप्रायः ।” इति रुग्विनिश्चयस्य वातव्याधिव्याख्याने विजयरक्षितः ॥)

हर्षकः, पुं, (हर्षयतीति । हृष् + णिच् + ण्वुल् ।) पर्व्वतविशेषः । इति शब्दमाला ॥ हर्षकारके, त्रि । इति शब्दरत्नावली ॥

हर्षणं, क्ली, (हृष + ल्युट् ।) हर्षः । इति धरणिः ॥ (यथा, महाभारते । ७ । १४४ । ११५ ।
“तच्छिरः सिन्धुराजस्य शरैर्वृद्धमवाहयत् ।
दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च ॥”)

हर्षणः, पुं, (हर्षयतीति । हृष् + णिच् + ल्युः ।) विष्कम्भादिसप्तविंशतियोगान्तर्गतचतुर्द्दशयोगः । तत्र जातफलम् ।
“सुचारुगात्रं स्फुटपद्मनेत्रं
शास्त्रप्रयत्ने विनयोपपन्नः ।
प्रसूतिकाले यदि हर्षणः स्या-
दमर्षणो नैव जनः कदाचित् ॥”

इति कोष्ठीप्रदीपः ॥ * ॥

चक्षूरोगविशेषः । श्राद्धविशेषः । श्राद्धदेवः ॥ हर्षकारके, त्रि । इति शब्दरत्नावली ॥ (यथा, महाभारते । ७ । ३१ । ७६ ।
“एवं सुकलिलं युद्धमासीत् क्रव्यादहर्षणम् ।
महद्भिस्तैरभीतानां यमराष्ट्रविवर्द्धनम् ॥”)

हर्षमाणः, त्रि, (हर्ष + ताच्छील्ये शानच् ।) हर्षयुक्तः । तत्पर्य्यायः । विकुर्व्वाणः २ प्रमनाः ३ हृष्टमानसः ४ इत्यमरः । ३ । १ । ७ ॥ प्रीतमानसः ५ । इति शब्दरत्नावली ॥

हर्षयित्नुः, पुं, (हर्षयतीति । हृष तुष्टौ + णिच् + “स्तनिहृषिपुषीति ।” उणा० ३ । २९ । इति णेरित्नुच् ।) पुत्त्रः । स्वर्णं, क्ली । इति मेदिनी ॥ हर्षणशीले, त्रि ॥

हर्षस्वनः, पुं, (हर्षसूचकः स्वनः ।) आनन्दध्वनिः तत्पर्य्यायः । किलकिला २ । इति त्रिकाण्डशेषः ॥

हर्षिणी, स्त्री, हर्षयतीति । । हृष् + णिच् + णिनिः । ङीप् ।) विजया । इति राजनिर्घण्टः ॥

हर्षितः, त्रि, आह्लादितः । हर्षोऽस्य जात इत्यनेन इतप्रत्ययेन निष्पन्नः ॥

हर्षुलः, पुं, (हृष तुष्टौ + “हृषेरुलच् ।) उणा० १ । ९८ । इति उलच् ।) मृगः । कामुकः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ हर्षणशीले, त्रि ॥ (यथा, कथासरित्सागरे । १२२ । २६ ।
“प्राभृतं प्रत्युतैतन्मे सिद्धमद्येति हर्षुलः ॥”)

हल, भ विलेखे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भ, हालः हलः । हलति भूमिं कृषकः । इति दुर्गादासः ॥

हलं, क्ली, (हलति भूमिमिति । हल + अच् ।) लाङ्गलम् । इत्यमरः ।२।९।१३ ॥ तत्पर्य्यायः ।
“हलन्तु लाङ्गलं गोदारणञ्च सीरकुन्तली ।”

इति जटाधरः ॥

तत्र गोयोजने दोषादोषौ । हारीतः ।
“अष्टागवं धर्म्महलं षड्गवं जीवितार्थिनाम् ।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥”

इति तृतीययामार्द्धकृत्ये आह्निकतत्त्वम् ॥ * ॥

हलप्रवाहदिनादि यथा । दीपिकायाम् ।
“पूर्व्वाग्नियाम्यफणिपित्र्यशिवान्यभेषु
रिक्ताष्टमीविगतचन्द्रतिथिं विहाय ।
द्वाङ्गालिगोसमुदये विकुजार्किवारे
शस्तेन्दुयोगकरणेषु हलप्रवाहः ॥ * ॥
हलप्रवाहवद्बीजवपनस्य विधिः स्मृतः ।
चित्रायाञ्च शुभे केन्द्रे स्थिरचर्मनुजोदये ॥”